The drama is an allegory as will be seen from the names of the actors and actresses used in the drama, viz., Vṛttivallabha, Anarthanidhi, Vṛtti, Pratiṣṭhā, Sevā, Lajjā, Kīrti, etc, and reminds one of the famous Prabodhacandrodaya of Kṛṣṇamiśra. Here we narrate the story of the drama in a nutshell. Vṛttivallabha, the hero of the drama is deprived of his fortune by the enraged ruler of Guzrāt, Mahīmuda Śāha, and so he intends to leave his country, Gurjaradeśa, in disguise as a mendicant for Benares. Vṛtti his lady-love has forsaken him and gone away. Vṛttivallabha entreats his companion Anarthanidhi to appease her on his behalf and narrate his (hero's) pitiable condition through her separation. Anarthanidhi unwillingly goes out but returns with the report that she is enjoying other's companionship and pays on heed to his appeal. Vṛttivallabha does not believe this and explains Vṛtti's conduct as an outcome of the sufferings of separation. Vṛtti, at this moment, enters the stage and rebukes Vṛttivallabha for his entreaties and reminds him of the fact that not many a person more qualified than him could have been her overlord for a considerable period. Vṛttivallabha is disappointed, rebukes her as unchaste but to no gain. He then requests her (Vṛtti's) friend Pratiṣṭhā to be his companion. Vṛtti disappears in disdain. Pratiṣṭhā complains about his indifferent attitude towards her in appeasing Vṛtti. Vṛttivallabha assures and begs pardon for that. Pratiṣṭhā advises him to proceed to Benares with her friend Kalā and herself. But Vṛttivallabha finds no peace without taking any revenege for the insult inflicted by Vṛtti upon him. Pratiṣṭhā opines that with the help of Kalā he will certainly be able to attain fortunes from other kings. But Vṛttivallabha declines to appease other rulers save Mahīmūda Śāha who once bestowed on him immense fortune. Otherwise, he must proceed to Benares in the guise of a mendicant and praise only the lord of the universe. Incidentally here Vṛttivallabha enquires about Kīrti. Kalā informs that on her way from Pṛṣṭhapura she (Kīrti) will be there to invite the scholars at the court

of Mālwā. (This Kīrti is described as the consort of Gyāsadīna, ruler of Mālwā) Kīrti then enters and assures Vṛttivallabha of her help in becoming the master of immense riches and an object of adoration to other kings. Vṛttivallabha when about to leave his country feels grieved for the long association with it and naturally hesitates. At the moment Lajjā with Āśā appears and rebukes him for this act of ingratitude. Vṛttivallabha narrates his helpless condition. He has no other alternative but to leave the country as his fortune is gone, he has to carry on his head a piece of yellow cloth and more over, he has been insulted in various ways in the court of the king. Lajjā informs him that the king is not really angry, but he adopted this measure in order to teach a lesson to the people. Lajjā requests Āśā to console Vṛttivallabha. Āśā consoles him saying that the king's character is full of contrasts and so this act of disregard should not be taken into consideration seriously. She advises him to attain the king with his service, entreat the ministers, and touch the feet of the justice ; otherwise without any material assistance he will not be able to proceed to Benares. Vṛttivallabha agrees but finds it difficult to approach the king in this state of affairs. Āśā says that she will ask her friend Karuṇā to lay his prayer before the king. Vṛttivallabha being hopeful wishes to report his desire to the king through Karuṇā in the following way : The king had once enriched him with immeasurable wealth and honour for his credit in composing several dramas and prose pieces, but now when he (the king) has deprived him of his fortune, is he to approach another king like a beggar ? Āśā brings Karuṇā on the stage and informs Vṛttivallabha that as his desire is going to be fulfilled, he should no more worry or contemplate upon leaving the country. The king will return everything through Rājasevā which have been previously taken away from him. Rājasevā enters at this moment and rejoices that it is fortunate enough that the king returns all to Vṛttivallabha and now he should protect his subjects remaining under the merciful protection of the king. Here ends the plot followed by the conventional Bharatavākya.

Karuṇā—Vṛttivallabha, what good else can I render to you ?

Vṛttivallabha—What else can remain good to me ? Still, let it be—(performed)—

Let the earth fulfill the desires of the people, the clouds be bountiful, the rulers protect their subjects like sons. Let the desire of the

wicked perish, on the earth always the wishes of the good (only) be fulfilled, (and) let compassion prevail in the mind of the rulers as long as the moon and the stars exist.

(Here ends the chāyānaṭaka, Vṛttivallabha composed by Śrīvyāsa laghukavi).[1]

---

1 करुणा—वृत्तिवल्लभ किं ते भूयः प्रियमुपकरोमि ।

वृत्तिवल्लभः—अतःपरं किं मे प्रियमस्ति । तथापीदमस्तु—

लोकानां वाञ्छितार्थं वितरतु वसुधा कामवर्षं पयोदाः
कुर्वन्तु क्षोणिपालाः सुतमिव सततं स्वप्रजां पालयन्तु ।
दुष्टानामिष्टनाशो भवतु भुवि सदा सज्जनानामभीष्टं
भूयादाचन्द्रतारं निवसतु करुणा मानसे भूमिपानाम् ॥१४

इति व्यासलघुकविविरचितं वृत्तिवल्लभं नाम छायानाटकं समाप्तम् । श्रीः ॥

श्रीव्यासलघुकविविरचितं
वृत्तिवल्लभं

नाम छायानाटकम्

श्रीगणेशाय नमः ।

द्वारे मत्तगजोत्कराः परिचराः प्रत्यर्थिपृथ्वी[1] भुजो
लीला [2]मन्दिरकिङ्करीव कुरुते कार्याणि सर्वाण्यपि ।
छायावत्कमलापि नोज्झति पदं यत्सेवकाणामसौ
जीयात् श्रीमहिमूदशाहनृपतिर्दैवस्य दैवं महत् ॥१

नान्द्यन्ते सूत्रधारः

आः प्रिये यः सकलजगत्परिपालनाय समादिष्टः परमपुरुषेण महीमवतीर्णो महेन्द्र इव भुवनजनमनोमनोपूरपूरणाय पौरुषमाश्रितः कल्पतरुरिव असाधारण-सौन्दर्येण द्वितीयभावमापन्नोऽश्विनीकुमार इव चम्पककर्पूरगौराकृतिं भजमानः साक्षाच्छृङ्गार इव सर्वाङ्गसौन्दर्यं दधानो मूर्तिमान्मदन इव जगज्जनलोचनानन्द-परम्परामातन्वानः कलङ्केनोज्झितः पूर्णेन्दुरिव वितरणगुणविजितविक्रमार्कविस्तारित कर्णवर्णनसुवर्णदानार्जितजरबक्सविरुदस्य पात्साहशिरोमणेः श्रीग्यासदीनस्यांगजः श्रीमहीमुदशाह पृथिवीपतिः । प्रिये तदिदानोमेतस्य महीपते रूपसौभाग्य-मालोकयन्ती निजनेत्रयुगं कृतार्थी कुरु ।

नटी—स्वामिन् यस्मिन् कृतकपटकोपाटोपेऽपि[3] महीमण्डलाखण्डल-प्रतिमानामपि पृथिवीभृजां हृदयानि स्फोटातङ्कशङ्कुलव्याकुलानि जायन्ते स एवायम् ।

सूत्रधारः—किमन्यत् । स एवायं रिपुराजन्यदावपावकपातशाहशिरोमणिः ।

---

1. पृथ्वि ।
2. लीलामंदिर.....We have used nasals instead of anusvāra to be found in the manuscript for grammatical reasons.
3. कोपाटोपेपी ।

नटी—तदहमस्येदानीं प्रतापपावकज्वलितपावकप्रतिसामाज्यमाकलयन्ती परमपुरुषमेकमेव याचे।

सूत्रधारः—आः प्रिये किमेवं याचसे ?

नटी—अवधारय स्वामिन्

यस्मिन् प्रसन्ने रिपवोऽपि दासा
मित्राण्यमित्राणि भवन्त्युदासे।
धातः सदा तं कुरु सुप्रसन्नं
दैयोपपन्नं महिमूदशाहम् ॥२

सूत्रधारः—तदेतदस्य रिपुकुलकालाग्नेः कोपानुभवः कुतस्ते कलावत्-कामिन्याः ? या त्वं सकरुणारसमानसाश्रुधारा कलितलोचना सगद्गदकण्ठा जगदीश्वरमेवमभ्यर्थयसे ?

नटी—स्वामिन् एतदखिलं करुणाकारणमिहागतो वृत्तिवल्लभ एव निवेदयिष्यति। पुनरहं स्त्रीस्वभावभीरुर्न निगदितुं पारयामि।

ततो नेपथ्ये वृत्तिवल्लभः।

सूत्रधारः (नटीं प्रति)—आर्ये अयमागतो वृत्तिवल्लभः। तदावामितः सन्देहगतौ कौतुकं पश्यावः।

ततः प्रविशति वृत्तिवल्लभः पीताम्बरखण्डमण्डितशिराः
सेवकेनानर्थनिधिना समम्।

नटी (तमालोक्य)—अहो अस्य महीमघवतः सौभाग्यम्। यन्नगर-मधिवसन्तो जनाः किंशुकरसरज्यमानोष्णीषपरम्परामभिवहन्तो निरन्तरवसन्त-महोत्सवाननुभवन्तो[1] लक्ष्यन्ते। किंच

कुङ्कुमारुणितमौलिवेष्टना उत्सुकारथ परम्पराश्रिताः।
हिन्दवो नवविहारमङ्गलाः सर्वतोऽपि विहरन्ति साम्प्रतम् ॥३॥

सूत्रधारः—प्रिये नेयं वसन्तमहोत्सवारुणता। किन्तु हिन्दुजनानामुप-

1. अनुभवं ते लक्ष्यन्ते।

लक्षणाय राज्ञो धर्माधिकारिभिरादिष्टा किंशुकरसरञ्यमानोष्णीषपरम्परा प्रान्त-रचना।

नटी—स्वामिन्नेषा निजवेषविशेषोपलक्षितानामप्येतत् पूर्वपरागतादधिकमिव प्रतिभाति।

सूत्रधारः—सत्यं प्रिये। पुनः कौतुकमिदं महीपतेः समाकर्णय

नानावर्णविशेषवेषरचना भिन्नेव यल्लक्ष्यते
तत्पीताम्बरखण्डमण्डितमिदं राज्ञा किमाज्ञापितम्।
नैतत्वंशपरम्परागतमहो राज्ञोऽपि नाज्ञाजुषाम्
नान्यस्मिन्नपि पातशाहविषये तत् कौतुकं भूपतेः ॥४

अलमलमनया राजकथया। वृत्तिवल्लभं पश्यावः।

वृत्तिवल्लभः—(अनर्थनिधिं प्रति) अनर्थनिधे समाकर्णय

या सीमा सुखसम्पदां समुदयस्थानं निदानं श्रियां
या संसारविहारसारसरसी प्राणाधिका प्रेयसी।
या लीलाकृतकौतुकेन कुपिता कल्पान्तकालायते
सा वृत्तिर्वनितामास्तु विमुखा कस्यापि हास्यादपि ॥५

अनर्थनिधिः—स्वामिन् सत्यमेव। कथमस्याः सौभाग्यपरम्परां वर्णयामि।

एषा भाग्यपरम्परां विदधती भर्तुः श्रियं सर्वतो
यच्छन्ती सुकृतौघसाधनपरा नानागुणग्रामभूः।
पुष्यन्ती[1] प्रतिवासरं नव नव कामान् मनः कामितान्
वृत्तिर्भाग्यवतां गृहे विलसति प्राणप्रिये चापरा ॥६

वृत्तिवल्लभः—अनर्थनिधे यदहमेतादृशान् विभावाननुभवामि तदेतस्याः सानुकूलायाः फलं कलय—

सुधाधौतावासाः सरसयुवतीनां शतमितः
सहस्रं भृत्यानां निवसति गृहद्वारमभितः।
हयाः संख्यातीता धनमपि च वाञ्छाधिकतरं
नृणां दाने शक्तिः सकलमपि वृत्तेर्विलसितम् ॥७

---

1. पुष्णन्ती ?

तदेनां कारणमन्तरेण कुपितां प्राणप्रियां यथाकथञ्चिदनुनय ।

ततोऽनर्थनिधिरितस्ततः विलोक्य वृत्तिवल्लभं प्रति—स्वामिन्नयमस्या अभिप्रायः । सा भवत् सकाशात् कोपेन गतेव प्रतिभाति ।

वृत्तिवल्लभः—तर्हि तत्सखीं प्रतिष्ठामाकारय ।

अनर्थनिधिः प्रतिष्ठे इत्याहूय स्वामिनं प्रति—प्रतिष्ठापि तया सह गतैव प्रतिभाति ।

वृत्तिवल्लभः—शिव शिव प्रतिष्ठापि गता ।

मनो हृत्वा वृत्तिर्मम नवगुणग्रामविभवैः
स्वयं मानिन्युच्चैर्मदविनयतः प्रेमकुपिता ।
इयं लीलालोला क्वचिदपि गता मां कलयितुं
प्रतिष्ठा पापिष्ठा पुनरनुगतैनां कथमहो ॥८

अनर्थनिधिः—सर्वथेयं मम प्रमाणं कलयितुमिति ।

[वृत्तिवल्लभः][1] —एषात्मनो निरोधाय [2]क्वचिदपिकारणा[3] न्निर्गता स्वभावतो मद्विरहभीरुरिति मामन्तरेण स्थातुमशक्ता विरहवेदनामनुभवन्ती प्रायः कृशाङ्गीभूता ममानुनयमात्रमिच्छन्ती नितरां क्षीणा भविष्यति । तथाहि । सम्प्रति तद्विरह-दशामनुभवतो मे वृत्तान्तं पुरो निवेद्य तद्विरहजातमखिलमाकलय्य सत्वरं समेहि ।

अनर्थनिधिः—प्रमाणमिति निष्क्रम्येतस्ततो गत्वा—स्वामिन् श्रीमद्विरह-जातमखिलं निवेदितम् । पुनरनया मामप्यनुपलक्ष्यमाणया क्षणं कर्णयोरपि चाधारि । कोऽसौ वृत्तिवल्लभ इति सन्देहदोलान्दोलितोऽपि नः[4] स्वामी ।

वृत्तिवल्लभः—अनर्थनिधे तत्प्रायोविरहविवशा भवितुमर्हति ।

अनर्थनिधिः—सत्यं स्वामिन् । किं ब्रूमस्तस्या विरहदशाम् ।

उन्मत्ता करिणीव पूर्वतनुतस्त्रैगुण्यमातन्वती
शृङ्गारध्वजतोरणादिभिरलं संभूषिता सर्वतः ।

---

1. Restored by us.
2. कचिदपि.....
3. कारणान्तर्गता.....
4. न ।

कृत्वा स्वं च नवं विवाहमधुना भर्त्रा समं खेलती
स्वामिस्त्वद्विरहेण वृत्तिवनिता धत्ते दशामीदृशीम्[1] ॥९

तदनुवृत्तिवल्लभः श्रावं श्रावं शिरोऽवधूय—अनर्थनिधे तदहं चिरतरानुराग-लीलामुद्भावयन्नेकवारमेनामनुनयामि ।

अनर्थनिधिः—को निवारयति । कथं नानुनयसि । समयज्ञोऽसि । अयमेवानुनयावसरः ।

वृत्तिवल्लभः (वृत्तेः करमलम्ब्य)—

वृत्ते कारणमन्तरेण कुपिता किं मां विहायाधुना
जीवन्तं बत नायकान्तरगृहं गन्तुं समुत्कण्ठिता ।
आः किं पापिनि लज्जसे न सहसा वेश्या विटे पञ्चतां
प्राप्ते पञ्चदिनान्यपि प्रणयतो वैधव्यदुःखं वहेत् ॥१०

अनर्थनिधिः—एकोए पाणिग्गहण कुणई उण एसो निलज्जोपायं न मुञ्चदि । सा[2] ऊचितीए जीविदं । रते पियेविवत्ता[3] उहमाणिं । ऐधणजीवितं वित्ते । एसो विरत्तरत्तो हे अन्धो वित्तिवल्लहो सच्चं । अहो हे अन्धो वित्तिवल्लहो अच्छरियं । अहो एसो अणवल्लहकुणए उण एसो णिल्लज्जो चाटडकोडिं कुव्वाणो एणामणुणेहि इत्युच्चैर्हसति ।

वृत्तिवल्लभः—(सभ्रूभङ्गमनर्थं वारयन् पुनर्वृत्तिं प्रति)—

रे वृत्ते व्यभिचारिणि प्रणयिनं मां चाटुकोटिं सदा
कुर्वाणं यदुपेक्षसेऽप्यविनये चापल्यमुच्चैस्तव ।
दुष्टे नो हृदि लज्जसे प्रियतमे रक्ते विरक्ता सती
सन्धानं कुरुषे परेण तदहो स्त्रीणां सतीत्वं वृथा ॥११

वृत्तिः—आः कपटकान्त मम स्वभावं जानन्नपि अज्ञ इव चाटुकोटिं कुर्वन् किं वृथा शोचसि । कस्त्वं वराकः । शृणु मुग्ध—

भुक्त्वा मां शतशो गता नृपसुताः केनापि नाहं गता
भुञ्जानानपि नो विहाय नृपतीन् कांस्कानहं कामये ।

---

1. ...मीदृशिं ।
2. साहुचितीए... ।
3. Restored by us.

जानन्तोऽपि महीभुजो ममकृते प्राणांस्त्यजन्तीह ये
तद्वृत्तास्थिरवृत्तिलेशविरहात्[1] किं मूढ़ संखिद्यसे ॥१२

वृत्तिवल्लभः—आः पापिष्ठे यथेष्टं याहि। सम्प्रत्यव[2] वगतं ते स्वरूपम्।

मानम्लानमुखी यदासि कठिने वृत्ते तदानीं मया
कृत्वा चाटुशतानि मानिनि महाकष्टैः प्रसन्नीकृता।
संभूय व्यभिचारिणीव सपदि स्वाम्यन्तरं काङ्क्षतो
तत्त्वं याहि यथेच्छया पुनरियं कान्ता प्रतिष्ठास्तु मे ॥१३

वृत्तिः—(सरोषं पाणिं मुञ्चयन्ती)—याहि प्रतिष्ठामेवाभुक्ष्व। का वारयति।

क्रयक्रीतेव दासीयं सदा मदनुवर्त्तिनी।
मया त्यक्तस्य कस्यापि प्रतिष्ठास्ति पतिव्रता ॥१४

वृत्तिवल्लभः—तत् किं त्वां तृणवन्मन्यमानां भर्तृहरिप्रमुखानां प्रतिष्ठा नासीत् यत्वमीदृग्गर्वसि। शृणु दुराचारे वृत्ते।

वृत्तिः—वद कपट कान्त।

वृत्तिवल्लभः—प्रणयिता तव ज्ञाता।

वृत्तिः—तत् किं सपदि परिणीतास्मीह भवता।

वृत्तिवल्लभः—न किं ते भर्ताहम्।

वृत्तिः—तदधिकगुणाः केऽपि न पुमांसो ममाभूवन्नीशाः।

वृत्तिवल्लभः—अहह कुलटे मुद्रय मुखम् ॥१५।

ततो लब्धा[3] वसरो वृत्तिवल्लभः प्रतिष्ठां प्रति—आकर्णयाकर्णय लोचने (?) प्रतिष्ठे। वयमस्यास्त्वां प्राणप्रियां सखीमिव मन्यामहे। पुनरियमविनयवती वृत्तिस्त्वां धनक्रीतां दासीमिवमन्यते। तदेतस्याः कथमपि दृढ़तराभिमानग्रन्थि-मुन्मोचय। यथासौ जानाति कस्याः कानुचरी। पुनर्वयमपि जानीमः—

वृथा कथा जनानां यत् प्रतिष्ठा वृत्ति किंकरी।
प्रतिष्ठाधिष्ठितान्मन्ये वृत्तिर्दासी वने वने ॥१६॥

---

1. ...लेशविरहा किं।
2. संप्रत्यवागतं।
3. लब्धावसवो।

आकर्णय प्रतिष्ठे सम्प्रति वृत्तिविरक्तं निरवलम्बं सनाथमप्यनाथमिव मां समुद्धर जगत्परिहासपातकाम्भोधेः (इति प्रतिष्ठां स्वकरेण करावलम्बनं कारयति ।)

प्रतिष्ठा—आकलय स्वामिन् । किं ब्रूमस्त्वां यदनयामोहितमानसस्त्वमन्यमहिमानं न वेत्सि । पुनरद्याप्यवहित्थां कुर्वंस्त्वामेव सापराधामन्तःस्मरन् स्वमिव मामेव परिहासपात्रं विधातुमुद्यतोऽसि । यन्मामङ्गीकुरुष्वेति चिरमवज्ञाता कलाप्रियसखीं मामधुना विप्रतारयसि । यदस्माकमचिराद्वृत्तेः प्रथमत एव गतसौभाग्यायाः पुनरहमन्यथातदनुनयलालसमानसं त्वामनुसरन्ती कलास्वामिन्याः पुरो न सौभाग्यभाजनं भवामि । पुनराकर्णय यथामोहित[1] त्वत्स्वरूपम् ।

पात्रं सन्तापकोटेः परिभवभवनं यात्रसेवा नृणां वै
वृत्तिर्दासी तदीयापुनरखिलजगद्भुक्तमुक्तान्यसक्ता ।
या निष्काश्य स्वयं तामनुनयसि महामूढ़चाटुनिकृत्वा
धत्से खेदं न चित्त पुनरभिलषसि स्वां प्रतिष्ठां [2]विधातुम् ॥१७

वृत्तिवल्लभः—आः कथमिच्छेति निष्ठुराक्षरं भाषसे भवति । कथं कलास्वामिन्याः पुरो हि न सौभाग्यभाजनं भवती ।

कलासख्यपि सन्तुष्टा तिष्ठन्त्यां त्वयि तिष्ठति ।
अविनाभावसम्बन्धो भवत्योरस्ति शाश्वतः ॥१८

पुनर्निरन्तरान्तःकृतस्नेहभावमजानती मामिह विहाय वृत्तेः प्रथमत एव गन्तुमुद्यता ।

प्रतिष्ठा—एवमेव । अनेकवनितावल्लभस्य ते मनोगताधिकस्नेहमजानत्यपि विषीदामि ।

वृत्तिवल्लभः—अहो सकलचातुर्यपरम्परापारं गतात्रभवती । मन्मानसान्तर्गतस्नेहं सत्यपि न जानते । तन्मे गृहवैषम्यं शृणु ।

बलादाकृषोच्चैः सकलमपिवृत्तेर्वसु मया
प्रतिष्ठे त्वत्युष्ट्यै[3] व्ययितमितियत्त्वं न चपला ।

---

1. मोहितस्त्वत् ।
2. धातुम् ।
3. तत्पुष्ट्यै ।

प्रतिष्ठा—(स्वामिनं प्रति)—किङ्कर्या मया किं करणीयम् (इत्यञ्जलिं बध्नाति ।)

वृत्तिवल्लभः—देवि प्रतिष्ठे यथाकथञ्चिदिदानीं स्वामिनमाराध्य स्वकीय-गीतकवित्वापत्यपरिवारादि स्वामिनोऽङ्के निधाय काशीनिवासदेशमहमभ्यर्थये । ममेति वासना । त्वया राजदत्तया प्रतिष्ठया यदुचितं तत्करणीयमिति ।

प्रतिष्ठा—तदनेन भूभुजा प्रसादपूर्वं प्रस्थापितस्य ते पुरतश्चरणा किङ्करी प्रतिष्ठाऽग्रेसरी किं किं न चरीकरोमि । पुनरुत्कर्षं वदती त्वत्तो विभेमि ।

वृत्तिवल्लभः—प्रिये मा भैषीः । स्वशक्त्या ब्रूवाणा मन्मानसमुत्साहय ।

प्रतिष्ठा—यद्यत्त्वां कारयामि तदेकया रसनया वक्तुं न पारयामि । तथाप्याकर्णय—

पृथिवीमवतीर्णस्य द्विजजातेर्यदुचितं हितं नाथ ।
लोकद्वयेऽपि यशसे यत्तत्वां कारयामि किं बहुना ॥३१
नानार्थकृतार्थीकृतदेशान् दर्शयामि त्वाम् ।
तत्तन्नरपतिलीलामाकलयन् सफलय स्वनेत्रयुगम् ॥३२
किमपि कला सुरसालं भूपालं सत्कलाभिराराध्य ।
प्रथय कलासौभाग्यं निजनाथस्यापि कीर्तिमुज्ज्वलय ॥३३
अति चपलायापि वृत्त्या दास्यं ते कारयामि राजकवेः ।
मत्तमहागजयानं दानमपि स्वर्णरत्नतुलनायाः ॥३४

तत्त्वं सत्वरमितः सुमुहूर्तमवलोक्य विविधकलाविलासैर्नानादेशनरेशमानसा-न्युल्लासयन् तत्तन्नरपतिनाट्यशालाकलितकौतुककोटिभिः कृतार्थीकृतनेत्रयुगलः सकलमहीपतीनग्रतः स्वामिकीर्तिं कुर्वन्ननृणीभवन् विश्वेश्वरराजधानीमविवस ।

वृत्तिवल्लभः—आः प्रिये प्रतिष्ठे प्रतिष्ठोचितमेव भाषसे । पुनरहं सम्बल-रहितोऽसहायश्चान्यदेशमार्गमजानंस्तत्तद्देशमहीशानां स्वविभवैः सतकारमकुर्वाणो निजमहिमानमतन्वन् कथं काशीं प्राप्नोमीति चिन्ता मे ॥ यतः

राज्ञः श्रीमहिमूदशाहनृपतेर्भिक्षुः पुनर्भूभुजां
सर्वेषामुपकारकृद्गुरुरहं लक्ष्याः लघुः संज्ञया ।
नानादेशमहीपतीन् स्वविभवैः संभाव्य वाराणसीं
नो गच्छामि तदा वृथा मम कथा यद्राजवाञ्छार्थदः ॥३५

तद्वैभवरहितोऽहं नानादेशमहीपतीनां चेतश्चमत्कारिणीं दानमानादिसम्भावनामकुर्वाणः कार्पटिकवेशेन[1] काशीमधिगच्छामीतिवाञ्छा मे।

प्रतिष्ठा—आः स्वामिन् किमेवं मत्प्रतिष्ठाप्रतिकूलं निष्ठुरं भाषसे। यत्त्वं वैभवाभावात् कार्पटिकवेशेन काशीं गन्तुमनाः। यतः—

कश्चित् [2]गुर्जरदेशतो विघटितो वाग्मी कलावान् कवी—
र्योद्धा वापि न भाग्यभाजनमभूद्देशान्तरे नार्चितः।
तत्त्वं राजकविर्विधाय विकृतं वेषं व्रजन् सर्वतोऽ-
प्युच्चैर्मे परिहास्यतां जनयसि स्वस्वामिकीर्तेरपि ॥३६

तदिदानीं सकलविलासैस्सकलमहीभुजामन्तःसन्तोषपरम्परां जनयन् स्वामिकीर्तिलतया परिपूर्तीकृतविभवो मम प्रतिष्ठायाः सुखमुपभुञ्जानः सम्राडिति काशीं किमिति नयामि। यदधुना वैभवविरहेन सकलजगदुपहासकारिकपटकार्पटिकवेषेण गमनमङ्गीकुरुषे।

वृत्तिवल्लभः—अविदितप्रतिज्ञा मे मामुत्साहयति देवी।

प्रतिष्ठा—काते प्रतिज्ञा।

वृत्तिवल्लभः—शृणु

अर्वाक्स्वर्णतुलादिकादिह मया कश्चित्कचिद्याचितः
क्षन्तव्यः क्षितिपालमौलिमुकुट प्रौढापराधो मम।
उत्तीर्णोऽयमहं लघुर्यदि तुलाचेलातद्वृत्तं नृपं
याचे तत्कथयामि गुर्जरपते न वस्त्रसूत्रं पुनः ॥३७॥

इति मे प्रतिज्ञा।

प्रतिष्ठा—(सचमत्कारम्)—अहो त्वयागामिवृत्तान्तमजानता महत् प्रतिज्ञातम्।

वृत्तिवल्लभः—अये कथमित्थं भाषसे। अयमहमाबाल्यादधिकाधिकक्षुद्रराजराजगुणवर्णनगीतकवित्वकोटिं कुर्वाणोऽप्युदरपूरणमात्रमप्यलभमानः सकलराजराजेन महिमूदमहीभुजा महीभुजामप्यसाध्यतुलापुरुषाद्यनेकदानपरम्परामभ्या-

---

1. वेशेष...।
2. गूर्ज्जर...।

सितः सन् सम्प्रत्येतज्जघन्यान्यराजन्यराज्ञः पुरः करप्रसारं कुर्वन् लघुरहमलघुगौरव-भाजनं न भवामि । इति कृतप्रतिज्ञो विश्वेश्वरमेवाभ्यर्थये । नान्यसामान्य-राजानाम् । यतः—

महिमूदमहीभर्तुर्जगत्कर्तुश्चनान्तरे ।
पुरुषः पृथिवीपीठे किमभ्यर्थयसे लघुः ॥३८॥

प्रिये इतोयं महती मत्प्रतिज्ञा ।

[प्रतिष्ठा][1] —सर्वतः सहस्रधापि वर्धितास्मि वल्लभेन । अहो मे सौभाग्यं प्रतिष्ठायाः । स्वामिन्

त्वामुज्झन्ती वृत्तिस्त्रिगुणीभूता वृथा कथा धनैरेव ।
अनया प्रतिज्ञया मेने शतधा संवर्धिता प्रतिष्ठाऽहम् ॥३९॥

पुनश्च

आबाल्यादधिकाधिकान्नरपतीन् स्तौमि प्रतिज्ञेति ते
स्तुत्वा मा महिमूदशाहमवधिं राज्ञां कृतार्थीकृता ।
एतस्मादधिकः पुराणपुरुषस्तंस्तौषिमुक्त्वापरान्
तत्सर्वं क्षितिपालसंसदि कवे पूर्णा प्रतिष्ठास्मि ते ॥(३९ क)[2]

तदिदानीमेवमेव कर्तव्यम् । यत् कविमतिरप्रतिहतैव ।

न कवेरपरो मन्त्री मतिमान्न कवेः परः ।
अतः पेयं नृपैः काव्यं रचनावचनामृतम् ॥४०॥

यत्त्वया महाकविना निर्णीतं तदुचितमेव । पुनस्त्वं राजकविभिर्विभवाभावाद्विकृत-वेषमभिवहन् सकलराजपरम्परासु हासभाजनं भवसि ।

वृत्तिवल्लभः—तत् किं करवाणि देवि प्रतिष्ठे । प्रथममेकाकी त्वां प्रतिष्ठा-माच्छादयन्नविदितपरदेशमार्गः कथं गच्छामि । नितराम्बिभेमि ।

---

1. restored by us.
2. verse number is not given.

प्रतिष्ठा—स्वामिन् मा भैषीः। असहायसम्बलचिन्तयालम्[1]। किं नाकर्णि भवता सकलसौभाग्यभूमिकाया मे कलासख्याः महीमघवतः कीर्त्या यत्समादिष्टम्।

कीर्तिर्मालवभूपतेर्मम कलासख्या समं सत्वरं
धावन्ती मिलिता क्व यासि कलयेत्युक्त्वा वदत्साहसम्[2]।
मर्यादामधिकृत्यभूमिवलये किं ते गते कारणं
विद्वद्वृन्दनिमन्त्रणाय जगतः स्वस्वामिना प्रेषिता ॥४१॥

वृत्तिवल्लभः—अहो असहायस्य मे महानसौ भाग्यभाजनं सहायः सम्पन्नः।

प्रतिष्ठा—सत्यं स्वामिन्

महासहायः सम्पन्नः कीर्तिस्ते मण्डपेशितुः।
ददती कल्पवल्लीव लीलयैव तवेप्सितम् ॥४१(क)॥

वृत्तिवल्लभः—प्रिये कला सम्प्रति लीलया क्व विलसति।

प्रतिष्ठा—तस्यैव मण्डपाचलमहीमघवतो विलासवेश्मनि। तत्पृच्छाम्येनाम्।

ततः प्रविशति कला।

कला मान्या राज्ञां मनसिजमहामोहनशरः
सुधांशोः सर्वस्वं शिवशिरसि चूड़ामणिरहम्।
कलाहीनः कश्चित् क्वचिदपि न शोभामनुभवे-
दुदासीनस्तस्माद्गुणनिधिनृपः कोऽपि न मयि ॥४२॥

वृत्तिवल्लभः—प्रतिष्ठे यदि कलास्वामिनी कृपयति तत्फलितमस्मन्मनोरथैः।

प्रतिष्ठा—सत्यं स्वामिन्

यद्येषास्ति सहायिनी तव कला पृष्ठे प्रतिष्ठास्म्यहं
तत्त्वं पूर्णमनोरथोऽसि सुकवे खेदं वृथा मा वृथाः।
राजानः शतशोऽपि सन्तिभुवने विद्याविनोदप्रिया-
स्तेभ्यस्त्वं स्थिरवृत्तिमेत्य सुकवे विश्वेशमाराधय ॥४३॥

वृत्तिवल्लभः—(कलास्वामिनीमाश्रिता)—मातः किमाह कीर्तिमालव-महीभर्तुः।

---

1. .....चिन्तयाहरे।

2. ...सा दिशा (?)—this is written by a different handwriting साहसम् was given originally.

कला—वत्स तदाकर्णय। प्रचण्डदण्डेनडिण्डिमडमत्कामातन्वतीयदुक्तवती मण्डपाचलमहीमघवतः कीर्तिः।

कलावन्तो लोकाः कृपणनृपतिद्वारि किमिति
प्रतिष्ठां स्वाभिष्टां गमयत कदाशाकवलिताः।
मया कीर्त्याहूताः पटुपटहघोषैर्मदधिपं
कलानां भोक्तारं भजत सुधियो मण्डपपतिम् ॥४४

वृत्तिवल्लभः—तन्मातः सकलजगद्याचकनिमन्त्रणायोद्यतयानया मण्डपमहीमघवतः कीर्त्या वयं साधारणकारणमात्रेणोपलक्षितास्तत्प्रायोऽस्मद्ग्रहवैषम्यविलसितमेव। तथाप्येषा स्वभावसौभाग्यसीमाऽस्मन्महोपकाराय प्रवर्तते एव। यतो निर्भयभावेन विश्वेश्वरराजधानीं मामनुप्रेषयति। अहो महीमूदमहीपते यत् किं तन्मे महोपकाराय। यतः

चित्रं श्रीमहिमूदशाहनृपतेः, प्रौढः प्रसादः सतां
सर्वेषामभिवाञ्छितं वितरति प्रायेण कल्पद्रुवत्।
कोपश्चित्रमिदं विचित्रकविताख्यातिं नवीनां नये-
दौदासीन्यमहो मदीयमधुना काशीनिवासाय मे ॥४५

अहो महच्चित्रं यदस्य प्रतिकूलतामप्यनुकूलतां कलयति कलावताम्। तन्मातः किमुक्तवती कीर्तिः।

कला—वत्स पृष्ठपुरः समागतेयं कीर्तिमण्डपमहीमहेन्द्रस्य। इयं स्वमुखेन सर्वमावेदयिष्यति।

ततः प्रविशति कीर्तिः। डिण्डिमध्वनेरनन्तरं कलावन्तो लोका इति पठति। पुनर्डिण्डिमध्वनेरनन्तरम्।

किं भो कवीन्द्राः कृपणनृपद्वारि भो हितं शृणुत।
दातुं दत्तावसरं मण्डपपतिमाशु यात किं बहुना ॥४६

वृत्तिवल्लभः—अहो अस्मन्सहायसामग्री सम्पन्ना। (कीर्तिं प्रणम्य) मातः कीर्ते दिष्ट्या ते दर्शनं जातम् (करसम्पुटं विधाय)।

श्रीमत्साहगयासदोनदयिते कीर्ते त्वदङ्के मया
न्यस्तमस्तकमस्ति विश्वविदिता त्वं कामधेनुः कवेः।
त्वं मातासि कलावतामिह लघुं पुत्रं प्रतिष्ठान्वितं
कल्याणेन यथा कथञ्चिदपि मां विश्वेश्वरं प्रापय ॥४७

कीर्तिः—वत्स मनोवाञ्छादधिकतरान्मनोरथान् पूरयामि। तदहं विद्वत्-कविकलावतां जननी कीर्तिर्महीमहेन्द्रग्यासदीनस्य। आकर्णय—

आसिन्धुक्षितिनायकानभिमुखानानीयसोपायना-
नाभूमिप्रणिपातजातविनयं ते कारयिष्याम्यहम्।
तत्सर्वस्वमपि त्वदीयपदयोः सन्मोचयन्ती कवे
कीर्तिमण्डपभूपतेरियमहं वाराणसीं त्वां नये ॥४८

वृत्तिवल्लभः—अहो सिद्धमस्मन्मनोरथैस्तद्व्रजामः सत्वरमितो दुजनजर्जराद्-गुर्जरदेशाद्विश्वेश्वरराजधानीम्। (इति प्रस्थानमारभते। किञ्चिदिव परिक्रम्य स्वदेशसौभाग्यमन्तःस्मरन्नातिहृष्टमनाः।)

हा हन्त गुर्जरधरे विहाय भवतीं व्रजामि कां वसतिम्।
त्रिदिवादिवाहमपतं महिमूदेन्द्र प्रसादतः स्खलितः ॥४९

इति सगद्गदं पुनः पठति।

शतशोऽपि सन्तिदेशाः क्वचन न तुल्योऽस्ति गुर्जरेण गुणैः।
राज्ञामस्ति सहस्रं न पुनर्महिमूदभुजा सदृशः ॥५०
कमिह कृपालुनृपालं रसिकतरं सत्कलाभिराराध्य।
धनकोटि कोटिकानां सहस्रमप्राप्य विस्मराम्येनम् ॥५१

(शिरः कम्पमानो नानन्दितमनाः प्रस्थातुमीहते)

(अत्रान्तरे लज्जा आशा सखीकरमवलम्बमाना सरभसमागत्य प्रयानाभि-मुखस्य वृत्तिवल्लभस्य चेलाञ्चलं दधाना विविधोपदेशवचनैः प्रयाणं निषेधयन्ती जननीवोपदिशति)।

[लज्जा]—आः वत्स किं विस्मृतम्।

आजन्मप्रतिपालितोऽसि कृपया यस्य प्रियालालितो
भिक्षुस्त्वं कविराजराजपदवीं संप्रापितः प्रत्यहम्।
नानादानमहाभिमानवसतीर्यल्लीलया निर्मित-
स्तद्विस्मृत्य दिनत्रयेण कुमते देशान्तरं प्रस्थितः ॥५२

वृत्तिवल्लभः—लज्जे मातः। आशे स्वसः। शृणुत भवत्यौ। किमहं कृतघ्न इव सुखपरम्परां भोक्तुं व्रजामि।

लज्जा—कथय किमन्यत् प्रयाणप्रयोजनं ते। यदेनं सकलकलारसालं भूपालं विहाय भूपान्तरं गन्तुमनाः।

वृत्तिवल्लभः—अहो गोप्यमपि गमनकारणं मातुरग्रे प्रकाश्यमेव ।

आकर्णय—मत्स्वामी शरदिन्दुसुन्दररुचिर्येन ज्वलत्पावका-
प्रख्योऽसौ विहितोहितः स जगतां येनादितो निर्मितः ।
दीर्घायुः स भवत्वहो पुनरहं स्वस्वामिकीर्तिं गृणन्
वैरी क्षोणीभृतां स्फुरद्गजघटादन्तप्रहारास्पदम् ॥५३

मातरमहमन्यत्र गच्छामि तत् किं मनोवाञ्छितं प्राप्तुम् । विधिविलसितमप्रतिहतम् । किं करवाणि । तेन व्रजामि न पुनः सांसारिकसुखान्युपभोक्तुम् । आकर्णय—

निदाघे गङ्गायास्तटनिकटवर्ती सुरतरुः
सिषेवे येनोच्चैरभिमतः फलत्यागरसिकः ।
न तस्मै रोचन्ते खदिरवदरीचञ्चलदला
रसालाः कागोष्ठीकरिहतकरीरक्षितिरुहाम् ॥५४

लज्जा—पिशुनजनाभिभूतमानसस्त्वं कथमात्मनोऽमङ्गलवचो भाषसे ।
खिन्नो दुर्जनदुर्वचोभिरभितः कस्मादकस्मादिदं
वत्सात्मानममङ्गलेन वचसा संयोजयस्यादरात् ।
अस्योच्चैर्महिमूदशाहनृपतेः कीर्तिं पुनः कुर्वतो
युक्तं मत्तगजाधिरोहणमहो दन्तिप्रहाराः कुतः ॥५५

वत्स मानसमाश्वासय । माभूः परिभवभाजनम् । मनोगतं दुःखजातमावेदय माम् । यदहं स्वामिने निवेद्य सकलमपि ते दुःखजातं दूरीकरोमि ।

वृत्तिवल्लभः—मातर्लज्जे समाकर्णय । प्रत्यहमुत्पद्यमानानां नवनवानर्थपरम्परामेकया जीह्वया वक्तुमपि न पारयामि । तथाप्याकर्णय—

खिन्नो वृत्तिवियोगतः पुनरहं राजप्रसादोज्झितो
वासः खण्डमिदं वहामि शिरसा क्षुद्रं हरिद्राङ्कितम् ।
त्यक्त्वोच्चैर्वरवाहनानि शकटारूढो वहन सर्वतो
राजद्वारि तिरस्कृतोऽपि बहुधा लज्जे न लज्जे कथम् ॥५६

लज्जा—मा विषीद वत्स नैतद्राजकृतम् ।

वृत्तिवल्लभः—भ्रातः एर्वारुचौरस्य कलतलप्रहार एवोचितः नतु खड्गप्रहार-परम्परां प्रचारः ।

प्रेमपात्रं प्रतिकृतः कोपः किं नास्य लज्जते ।
प्रहार इव खड्गस्य कान्ताकुचयुगं प्रति ॥५७

किञ्च

कोपः कलावतां कालो भृकुटी प्रकटीकृतः ।
कामिनीनां मनोन्मादवारणं वारणैः किमु ॥५८

लज्जा—वत्स नायं तत्त्वतो राजकोपः । किन्तु शिक्षणार्थं सर्वलोकानाम् । मा विषीद । (आशां प्रति) सखि आशे वृत्तिवियोगविह्वलं तुरगाधिरोहतिरस्कृतं त्वमेनं आश्वासय ।

आशा—भ्रातः परिहर दैन्यम् । मा विषीद । समाकर्णय ।

मद्ग्रामान् सहसोपहृत्य नृपतिः प्रादात् परस्मै कथं
मा चिन्तामिति वृत्तिवल्लभ वृथा यद्वाजिनं त्याजितः ।
देशान् दातुमसौ क्षमस्तव न किं नीत्वारिभूमीभुजां
त्वामारोहयितुं नवान्[1] करिवरान् नासीरदीनः क्षणात् ॥५९
ब्रह्मेव प्रतिवासरं न विषमः सर्वेषु लोकेष्वयं
संसर्गात् स्फटिकप्रभेव विविधान् वर्णानसौ दर्शयेत् ।
रक्तोऽप्येष विरक्तवत् परकृतौ कोपप्रसादावुभौ
राजा निर्मल एव यत् कृतिरियं तानेव निर्भत्सय ॥६०

तदिदानीं सेवया स्वामिनमाराधय विशेषेण मन्त्रिणोऽनुनयन् विशेषेण धर्माधिकारिणां चरणान् गृहाण । प्रकारान्तरं पुनरत्र न पश्याम्यशरणस्य ते । अन्यच्च सम्बलरहितस्य ते वाराणसीगमनप्यसाध्यम् ।

वृत्तिवल्लभः—मातस्तदेव कर्तुमुद्यतोऽस्मि । पुनरिहेदमसाध्यमधुना ।

स्वामी चन्दनवृक्षयन् द्विरसनैः रुद्धः कलाजीविना ।
भिक्षावृत्तिविलुण्ठनाय रिपवोऽभूवन्नमी मन्त्रिणः ।
न्याये ये नियुतास्त एव हि महानर्थस्य मूलं ततः
कीर्तिः कल्पलतेव वाञ्छितफलं ते सम्बलं दास्यति ॥६१

---

1. नवा करिवरान् ।

सम्बलेनापि नो कार्यं न भूपान्तरसेवया ।
मनोगतमजानन्त्या नाशया नापि लज्जया ॥६२

तत् सर्वथा प्रतिज्ञापूर्वकमनङ्गीकृतान्यदानस्य सम्बलरहितस्य मे वाराणसी-गमनप्यसाध्यमिव पश्यामि ।

आशे गच्छ गृहं दिनानि कतिचित्तिष्ठ प्रतिष्ठेऽन्तिके
लज्जे मुञ्च ममाञ्चलं कुरु कले साम्राज्यमुच्चैस्तव ।
य कोटेरधिकं धनं मम लघोः प्रादात्तदानृन्यभू-
र्देहान्तेन भवामि कीर्तिपटहक्वाणैः पुरो वैरिणाम् ॥६३

आशा—मा विषीद । करुणासखीमुखेन स्वामिने निवेद्य सकलमपि ते दुःखं दूरीकरोमि । तदाहमाशा स्वसा ते ।

भ्रातः परिहरदैन्यं करुणा जागर्ति गुर्जराधिपतेः ।
या जगतामपि जीवनहेतुः सा तामुपेक्षते कस्मात् ॥६४

वृत्तिवल्लभः—दया राज्ञो लीलाम्बुधितलनिमग्ना तव सखी
श्रमात्सुप्ता लज्जे जगदुपकृतिं सा विदधती ।
हता हिंस्रैः किंवा किमुतदलिता लोभकरिणा
यतो नाविर्भूता गृहचटकघातस्य समये ॥६५

आशे स्वसः सत्यमेवैतत् । सा स्वामिकरुणा जगज्जीवनमेव । पुनर्ग्रह-वैषम्यवशेन मे सकलं जगद्विपरीतं जातमिति बिभेमि ।

आशा—मा भैषीः ।

उदेति भानुर्वारुण्यां वह्निः शैत्यमुपैति चेत् ।
तत्प्रभोर्महिमूदस्य करुणाप्येति विक्रियाम् ॥६६

वृत्तिवल्लभः—आशे येऽस्माभिः सत्कारपरम्पराभिरभिवर्द्धिताः सम्प्रति तेऽस्मद्विज्ञप्तिमात्रमपि न कुर्वन्ति ।

आशा—भ्रातः का ते विज्ञप्तिः । व्याहर सर्वमहं करुणामुखेन स्वामिने निवेदयामि ।

वृत्तिवल्लभः—आशे श्वसस्तदिमां विज्ञप्तिश्लोकं[1] करुणामुखेन स्वामिने निवेदय ।

---

1. शंवलेना..... ।

येषामप्युपकारकारणमहं ते वैरिणो मेऽभव-
न्नित्यं ये स्तुतिवादिनः सपदि ते कर्णेजपा भूपतेः ।
सम्पत्तिर्विपदि भवद्धनमहो लोष्ट्रायितं सर्वतोऽ-
लभ्यं देयमभूत्त्वयि प्रकुपिते नासीरदीनक्षणात् ॥६७
स्वामिन् यद्यपि तैर्गुणैः स्तुतिमयैः काव्यैर्नवैर्नाटकैः
सङ्गीतैरभिवर्द्धिता कविषु ते शाताकृता साम्प्रतम् ।
तत्तेषां ग्रहयोगतः पुनरहो सामान्यतस्ते प्रजा-
मात्रस्यापि कृता समु[2] .....वीन् कस्मादकस्मादिव ॥६८
त्वदङ्घ्रिविरहव्यथां नवनवैरनर्थैः समं
प्रभो भगवतो यतः स्थि.....नास्ति मे जीवितम् ।
नचेदहह ते कृपाविरहवेदनैकाग्रता
विदीर्णहृदयस्य किं भवति नाथ संजीव(नम्।[3]) ॥६९
नाथ त्वं नवनाटकानि रचयन् नाना प्रबन्धान् गृणन्
गायन् गीतपरम्परां तव मुदा काव्यानि कुर्वन् मुदा ।
दत्त्वा कोटिमितं च भवता दानाभिमानीकृतः
कं भूपालमुपैति ते कविरसौ नासीरदी.....श ॥७०

(ततः) आशा (करुणामुपानयन्ती वृत्तिवल्लभं प्रति)—वत्स ते वाञ्छितार्था सिद्धिर्जाता वितर.....पनिकाम् । सकल जगत्कल्पलतयानया करुणया कृतार्थीकृतोऽसि ।

करुणा—मा चिन्तां कुरु वृत्तिवल्लभ सुखं तिष्ठ प्रतिष्ठासुखं
भुञ्जानो गुणसिन्धुगुर्जरपतेर्गायन् गुणान् सर्वतः ।
प्रायश्चित्तमियं गृहीतुमिव किं मिथ्याभिशप्ता सती
वृत्तिस्ते पुरतः करोति शपथान् नान्येनभुक्तेत्यहम् ॥७१

वृत्ति—शृणु स्वामिन्
त्वत्तो वियोजिता दुष्टैर्नानीता नृपमन्दिरम् ।
कष्टमुत्कृष्टमेतन्मे लुण्ठाकैर्लुंठितान्तरे ॥७२

1. विज्ञप्तिश्लोकौ... ।
2. Letters eaten up by insects.
3. Restored by us.

करुणा—वत्स यत्त्वद्गृहीतं सर्वस्वं तत्ते राजसेवा प्रत्यर्पयिष्यति ।

(ततः प्रविशति राजसेवा)

राजसेवा—सौभाग्यं महिमूदशाहनृपते करुणे मेरोर्महत् स्वं कृतं
भूमीन्द्र लघुभिक्षुकस्य भवनं प्रत्यानयन्त्या त्वया ।
चिन्तोद्दामदवाग्निदग्धमनसामुज्जीवनं कुर्वती
भक्तानामभयप्रदे चिरतरं तत्त्वं प्रजां पालय ॥७३

करुणा—वृत्तिवल्लभ किं ते भूयः प्रियमुपकरोमि ।

वृत्तिवल्लभः—अतःपरं किं मे प्रियमस्ति । तथापीदमस्तु ।
लोकानां वाञ्छितार्थं वितरतु वसुधा कामवर्षं पयोदाः
कुर्वन्तु क्षोणिपालाः सुतमिव सततं स्वप्रजां पालयन्तु ।
दुष्टानामिष्टनाशो भवतु भुवि सदा सज्जनानामभीष्टं
भूयादाचन्द्रतारं निवसतु करुणा मानसे भूमिपानाम् ॥७४

इति श्रीव्यासलघुकविविरचितं वृत्तिवल्लभं नाम छायानाटकं समाप्तम् । श्रीः ॥

कूपे पानमधोमुखस्य हि भवेत् व्याप्यो वराक्यः स्त्रियः
सामान्यवकटिट्टिभैः सह सरस्येवं समालोकयन् ।
नादत्त तृषितोऽपि हीनसलिलं क्रूरैर्वृतं जन्तुभि-
र्मानादुन्नतकन्धरः सुरपतिं तच्चातको याचते ॥१
चातकः स्वाभिमानेन जलं प्रार्थयतेऽम्बुदात् ।
सस्वौदार्यतया नित्यं प्लावयत्यम्बुना महीम् ॥२

चातकस्य मुखचञ्चुसम्पुटे नो पतन्ति यदि वारिबिन्दवः ।
सागरीकृत महीतलस्य किं दोष एव जलदस्य दीयते ॥३
कठिनकुठारच्छेदं घर्षणमपि निर्भरं सहते ।
कुचपरिरम्भणलोभाच्चन्दनमिन्दीवराक्षीणाम् ॥४
मनो मे नायातं किमुतकुचयोरन्तरगतं
किमुद्धर्षधस्तं किमुत विरहाग्नौ निपतितम् ।
तरुण्या लावण्यामृतसरसि मग्नं किमथवा
चरन्मारश्चौरः किमु समहरद् यौवनधने ॥५

दिव्यं [1]चूतरसं पीत्वा न गर्वं याति कोकिलः।
पीत्वा कर्दमपानीयं भेको भकभकायते ॥६
अपदो दूरगामी च साक्षरो न च पण्डितः।
मौनी संस्कृतवक्ता च समुद्रो वारिवर्जितः ॥७

श्रीरस्तु। श्रीः॥ श्रीः॥ श्रीः॥

1. नूतः.....।